FYBA
Sem II

Sanskrit I

**Q.P. Code :03975**

(03 pages)
30 copies
18/4/17

**[Time: - 3 Hours]** **[ Marks: 100]**

Please check whether you have got the right question paper.

N.B:
1. All Questions are compulsory.
2. All Questions carry equal marks.
3. Figures to the right indicate marks to a subquestions.

१. केवलं **व्दौ समूहौ** अनुवदत। १०

A. (i) अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा।
आजुहाव महीपालान्भीमो राजा स्वयंवरे।।
तद् श्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः।।

(ii) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्ध्दके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैःकर्णमागत्य चापलाय प्रचोदितः।।

B. (i) पश्चाच्चित्रं विचित्रं च तस्यां भित्तौ लिखेद्बुधः। १०
नानाभावरसैर्युक्तं सुवेषं वर्णकोचितम्।।
कनिष्ठिकापरीणाहां भागद्वयसमायताम्।
घनवेणुसमुद्भूतां तूलिकां परिकल्पयेत्।।

(ii) प्रकाशः- कथय। कथं त्वमत्र समागतः। अपि कुशलं ते कुटुंबम्।
विनोदः- कुंटुंबम्। अरे, मम कुटुंबिनी तु-
प्रकाशः- किं तस्याः।
विनोदः- अरे, किं न तस्याः। तस्याः कृते मया बन्धुजनाः व्यक्ताः। पितरौ गृहात् निष्कासितौ। सर्वमर्जितं धनं तस्याः कृते व्ययितम्। ऋणं कृत्वापि तस्यै महार्घम् अशनं, वसनं, निवासः सर्वं सर्वं प्रदत्तम्।

C. (i) विनोदः- किन्तु, मां परित्यज्य केनापि सह सा पलायिता। १०
प्रकाशः- अहो भाग्यम् (वाक्स्खलनं विज्ञाय स्वरपरिवर्तं कृत्वा) अहह!
विनोदः- अतः एतत्सर्वं शून्यं शून्यमिव प्रतिभाति मे। नोत्सहे जीवितुम्। वरं प्राणत्यागः न च पुनर्भार्यां विना जीवनम्।
प्रकाशः- किं सत्यमेव जीवितुं नोत्सहसे।
विनोदः- अथ किम्। प्राणत्यागार्थमेव अत्राहं समागतः।

TURN OVER

(ii) नीली शङ्खेन संयुक्ता कपोतसदृशी भवेत्।
राजावर्तः स एव स्यादतसीपुष्पसन्निभः।।
केवलैव हि या नीली भवेदिन्दीवरप्रभा।
हरितालेन मिश्रा चेज्जायते हरितच्छविः।।

२. केवलं **व्दौ परिच्छेदौ** लिखत।
A. उपमा कालिदासस्य। १०
B. गीतगोविन्दम् १०
C. उपनिषद्वाङ्मयम्। १०

३. केवल **व्दौ** उत्तरत। १०
A. ससन्दर्भं स्पष्टीकुरुत।
(i) नैषधं वरयामास भैमी धर्मेण पाण्डव।
(ii) ते हेमे प्राणा अहं श्रेयसे विवदमाना ब्रह्म जग्मुः।

B. ससन्दर्भं स्पष्टीकुरुत। १०
(i) स्थूला मध्या तथा सूक्ष्मा तया चित्रं विरच्यते।
(ii) यः पलायते स जीवति।

C. रघुवंशस्य मङ्गश्लोकः स्पष्टीकुरुत। १०

४. केवल **व्दौ** उत्तरत। १०
A. 1) सन्धिविग्रहं कुरुत।
(i) बाहुरिव।
(ii) देवास्तम्
(iii) वर्णो न।
(iv) कवेरिदं
(v) खल्वहम्

2) रुपपरिचयं कुरुत।
(i) प्रभया
(ii) चक्षुषा
(iii) क्षिप्त्वा
(iv) प्रमाणीकर्तव्यः
(v) पथिकेभ्यः



8913A891E5164E8F2A52972FFDC43BD7

B. श्लोकपूर्तिं कुरुत। १०

(i) यथा ________ यथाकामार्चितार्थिनाम्।
________ यथाकालप्रबोधिनाम्।।
________ संभृतार्थानां सत्याय ________ ।
यशसे ________ प्रजायै गृहमेधिनाम्।।

(ii) मधु ________ गरुडासन ए।
________ निदान जय जयदेव हरे।।
________ लोचन ________ ए।
________ जय जयदेव हरे।।

C. संस्कृतेन उत्तरत।
(i) रघुवंशस्य प्रभवः कस्मात् जातः?
(ii) प्राणाः कति कालं प्रोष्य आगताः?
(iii) लेपद्रव्यस्य अपरं नाम किम्?
(iv) के दैत्याः हताः?
(v) सागरतटे कौ परस्परौ मिलितौ?

५. टिप्पणीं लिखत। (केवलं **द्वे**)

A. (i) विजिगीषुः। १०
(ii) सदसद्व्यक्तिहेतवः।

B. (i) पञ्चप्राणाः। १०
(ii) महासुहयः सैन्धवः।

C. (i) स्वयंवरे उपस्थिताः राजानः। १०
(ii) सभामण्डपः।

D. (i) नान्दी। १०
(ii) भरतवाक्यम्।

---------------